## Prōkṣhaṇa Mantrāḥa

[(1) KYV TB 2-6-5-2&3 ; (2) TS 1-7-10-3 ; (3) TB 3-5-10-4&5 ; (4) TB 2-6-6-3&4]

ॐ देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् ।

ॐ dēvas'yat' tvā savitu[fp]' prasavē |

aśh'vinōōr'bāhubh'yāām |

पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन ।

pūṣh'ṇō has'tāābh'yām | aśh'vinōr'bhaiṣhaj'yēna |

तेजसे ब्रम्हवर्चसायाभिषिञ्चामि । देवस्य त्वा सवितुः प्रसवे ।

tējasēb' bram'havar'chasāyābhiṣhiñ'chāmi |

dēvas'yat' tvā savitu[fp]' prasavē |

अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्याम् ।

aśh'vinōōr'bāhubh'yāām | pūṣh'ṇō has'tāābh'yām |

सरस्वत्यै भैषज्येन । वीर्यायान्नाद्यायाभिषिञ्चामि ।

saras'vat'yai bhaiṣhaj'yēna |

vīr'yāyān'nād'yāyābhiṣhiñ'chāmi |

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् ।

dēvas'yat' tvā savitu[fp]' prasavē |

aśh'vinōōr'bāhubh'yāām |

पूष्णो हस्ताभ्याम् । इन्द्रस्येन्द्रियेण ।

श्रियै यशसे बलायाभिषिञ्चामि ॥ १ ॥

pūṣh'ṇō has'tāābh'yām | in'dras'yēn'driyēṇa |

śhriyai yaśhasē balāyābhiṣhiñ'chāmi || 1 || (1)

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॓ऽश्विनो॓र्बा॒हुभ्यां॓ पू॒ष्णो हस्ता॓भ्या॒ꣳ सर॑स्वत्यै
वा॒चो य॒न्तुर्य॒न्त्रेणा॒ग्नेस्त्वा॒ साम्रा॓ज्येना॒भिषि॑ञ्चा॒मीन्द्र॑स्य त्वा॒
साम्रा॓ज्येना॒भिषि॑ञ्चा॒मी बृ॒हस्पते॓स्त्वा॒ साम्रा॓ज्येणा॒भिषि॑ञ्चा॒मि ॥२॥

dēvas'yat' tvā savitu[fp]'
prasavēē (a)śh'vinōōr'bāhubh'yaām'
pūṣh'ṇō has'taābh'yāgm' saras'vat'yai
vāchō yan'tur'yan'trēṇāg'nēs'tvā
sām'rāāj'yēnābhiṣhiñ'chāmīn'dras'yat' tvā
sām'rāāj'yēnābhiṣhiñ'chāmi bṛhas'patēēs'tvā
sām'rāāj'yēnābhiṣhiñ'chāmi ॥ 2 ॥ (2)

आयु॒राशा॓स्ते । सु॒प्रजा॒स्त्वमाशा॓स्ते ।
āyurāśhaās'tē । sup'rajās'tvamāśhaās'tē ।

स॒जा॒त॒व॒न॒स्यामाशा॓स्ते । उत्त॑रां दे॒वय॒ज्यामाशा॓स्ते ।
sajātavanas'yāmāśhaās'tē ।
ut'tarān' dēvayaj'yāmāśhaās'tē ।

भूयो॑ ह॒विष्कर॑ण॒माशा॓स्ते । दि॒व्यं धामाशा॓स्ते । विश्वं॑ प्रि॒यमाशा॓स्ते ।
bhūyō haviṣh'karaṇamāśhaās'tē ।
div'yan' dhāmāśhaās'tē । viśh'vam' priyamāśhaās'tē ।

यद॒नेन॑ ह॒विषाऽऽशा॓स्ते । तद॑श्या॒त्तद्दृ॑ध्यात् ।
तद॑स्मै दे॒वा रा॑सन्ताम् ॥३॥
yadanēna haviṣhā (ā)śhaās'tē । tadaśh'yāt'tadṛd'dhyā-te ।
tadas'mai dēvā rāsan'tām ॥ 3 ॥ (3)

द्रुपदादिवेन्मुमुचानः । स्विन्नः स्नात्वी मलादिव ।

drupadādivēn’mumuchānaḥa ।

svin’nas’ snāt’vī malādiva ।

पूतं पवित्रेणेवाऽऽज्यम् । आपः शुन्धन्तु मैनसः ॥४॥

pūtam’ pavit’rēṇēvā (ā)j’yam’m ।

āpaśh’ śhun’dhan’tu mainasaḥa ॥ 4 ॥ [4]

भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः ।

bhūr’bhuvas’suvō bhūr’bhuvas’suvō

bhūr’bhuvas’suvaḥa ।

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www Sai Veda net